**<u>जुहोत्यादिगणे हलन्तधातवः</u>**

जुहोत्यादिगणे २४ धातवः सन्ति । तेषु १६ धातवः अजन्ताः, ८ धातवः हलन्ताश्च । १६ अजन्तधातवः अस्माभिः पूर्वमेव परिशीलिताः; अधुना अष्ट हलन्तधातवः द्रष्टव्याः । अस्माभिः ज्ञातं यत्, यथा सर्वेषु गणेषु, कर्त्रर्थके सार्वधातुकप्रत्यये परे, **कर्तरि शप्** इत्यनेन शप् विहितः अस्ति । तदा जुहोत्यादिगणे **जुहोत्यादिभ्यः श्लुः** (२.४.७५) इत्यनेन शपः श्लु (लोपः) भवति । अतः जुहोत्यादिगणे कोऽपि विकरणप्रत्ययः न दृश्यते ।

**जुहोत्यादिभ्यः श्लुः** (२.४.७५) = जुहोत्यादिगणे स्थितेभ्यः धातुभ्यः विहितस्य शप्-प्रत्ययस्य श्लु (लोपः) भवति । जुहोत्यादिः येषां ते जुहोत्यादयः, तेभ्यः जुहोत्यादिभ्यः । जुहोत्यादिभ्यः पञ्चम्यन्तं, श्लुः प्रथमान्तं, द्विपदमिदं सूत्रम् । **अदिप्रभृतिभ्यः शपः** (२.४.७२) इत्यस्मात् **शपः** इत्यस्य अनुवृत्तिः । अनुवृत्ति-सहितसूत्रम्— **जुहोत्यादिभ्यः शपः श्लुः** ।

अत्र प्रश्नः उदेति यत् लुप्-श्लु इत्यनयोः भेदः कः ? द्वाभ्यां प्रत्ययस्य अदर्शनम् इति तु अस्ति । लोपः इत्युक्ते प्रत्ययः अदृष्टः, परन्तु अदृष्टे सत्यपि कार्यक्षेत्रे लुप्तस्य प्रभावः तदानीमपि अस्ति । एतदर्थं सूत्रम् अस्ति **प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) ।

**प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) = प्रत्यये लुप्ते सति, प्रत्ययं मत्वा तस्य द्वारा विहितं कार्यं स्यात् । प्रत्ययस्य लोपः प्रत्ययलोपः षष्ठीतत्पुरुषः, तस्मिन् प्रत्ययलोपे । प्रत्ययस्य लक्षणं निमित्तं यस्य तत् प्रत्ययलक्षणम्, बहुव्रीहिः । सूत्रं स्वयं सम्पूर्णम्— **प्रत्ययलोपे प्रत्ययलक्षणम्** ।

तर्हि प्रत्यये लुप्ते तदाश्रितं कार्यं भवति । श्लु न तथा; प्रत्ययस्य श्लु भवति चेत् न केवलं प्रत्ययः गच्छति, अपि तु तदाश्रितं कार्यमपि न स्यात् । तद्विधायकं सूत्रम् अस्ति **न लुमताऽङ्गस्य** (१.१.६३) ।

**न लुमताऽङ्गस्य** (१.१.६३) = यस्मिन् शब्दे 'लु' अस्ति, तेन शब्देन प्रत्ययादर्शनं विहितं चेत्, सः प्रत्ययः अङ्गकार्यस्य निमित्तं न स्यात् । लुः अस्य अस्ति इति लुमान्, तेन लुमता । न अव्ययपदं, लुमता तृतीयान्तम्, अङ्गस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् । **प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) इत्यस्य पूर्णतया अनुवृत्तिः । अनुवृत्ति-सहितसूत्रम्— **लुमता प्रत्ययलोपे अङ्गस्य प्रत्ययलक्षणं न** ।

अस्मिन् सूत्रे लुमता, लुमत् इति प्रातिपदिकस्य तृतीयाविभक्त्यन्तं रूपम् । इदं मतुप्-प्रत्ययान्तं; प्रथमाविभक्तौ लुमान् । मतुप्-प्रत्ययस्य अर्थः अस्य अस्मिन् वा; यथा बुद्धिमान् इत्युक्ते बुद्धिः अस्य अस्मिन् वा, सः बुद्धिमान् । तर्हि 'लु' अस्य अस्मिन् वा, सः लुमान् । व्याकरणे त्रयः लुमन्तः सन्ति— लुक्, श्लु, लुप् चेति । इदं सूत्रं वक्ति यत् येन अदर्शनं भवति, सः लुमान् अस्ति चेत्, प्रत्ययलोपे प्रत्ययलक्षणं न भवति । अनुवृत्ति-सहितसूत्रं तथैव— **(यदा) लुमता प्रत्ययलोपे (तदा) अङ्गस्य प्रत्ययलक्षणं न** । अतः **न लुमताऽङ्गस्य** (१.१.६३) इति सूत्रं **प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) इत्यस्य बाधकसूत्रम् । तर्हि अत्र सारांशः एवं यत् श्लु इत्यनेन कस्यचित् प्रत्ययस्य अदर्शनं भवति चेत्, यस्मात् अङ्गात् सः प्रत्ययः लुप्तः जातः, तस्मिन् अङ्गे सः लुप्तप्रत्ययः तदानीम् अङ्गकार्यस्य निमित्तं न भवितुम् अर्हति ।

आहत्य लोपप्रकरणे चत्वारि सूत्राणि । क्रमेण—

**अदर्शनं लोपः** (१.१.६०) = लोप-संज्ञया अदर्शनं विहितम् ।
**प्रत्ययस्य लुक्श्लुलुपः** (१.१.६१) = लुक्, श्लु, लुप् इत्याभिः तिसृभिः संज्ञाभिः अदर्शनं विहितम् ।
**प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) = प्रत्यये लुप्ते तदाश्रितं कार्यं स्यात् ।
**न लुमताऽङ्गस्य** (१.१.६३) = लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् ।

जुहोत्यादिगणे विकरणप्रत्ययः शप् आसीत्, अनन्तरं तस्य स्थाने श्लु अभवत् । लुमता शपः अदर्शनं जातम्, अतः धात्वङ्गे शप्-निमित्तकम् अङ्गकार्यं नार्हम् ।

अत्र प्रश्नः आयाति यत् 'श्लु' एकः प्रत्ययः अस्ति किम् ? बोध्यं यत् श्लु-निमित्तीकृत्य द्वित्वं भवति; अनेन प्रमाणितं यत् प्रत्ययः अस्त्येव । श्लु इति अभावः नास्ति, अपि तु भावः एव । न दृश्यते, किन्तु भावः । एवमेव लोपः, लुक्लुप् इत्येते सर्वे भावाः ।

अधुना नूतनप्रश्नः उदेति यत् अदादिगणे लुक् अपि लुमान् अस्ति, जुहोत्यादिगणे श्लु अपि लुमान् | द्वयमपि लुमान् चेत्, द्वयोः भेदः कः ? वस्तुतः द्वयोः कुत्रचित् साम्यं, कुत्रचित् च भेदः | साम्यं अस्मिन्, यत् लुमान् सन् प्रत्ययलक्षणं न भवति | पुनः भेदः, यतोहि विशिष्टसूत्राणि भवन्ति लुकः कृते श्लोः कृते च | यथा अदादिगणे **उतो वृद्धिर्लुकि हलि** इति सूत्रम् अस्माभिः दृष्टं, येन गुणं प्रबाध्य वृद्धिर्भवति | श्लु इत्यनेन तादृशं कार्यं न प्राप्यते | किन्तु श्लोः विशिष्टं कार्यमपि अस्ति, यत् लुक् इत्यनेन न सिध्यति | तत्र प्रमुखं कार्यम् इदम्—

**श्लौ** (६.१.१०) = श्लौ परे धातोः द्वित्वं भवति | श्लौ सप्तम्यन्तम्; एकं पदमिदं सूत्रम् | **लिटि धातोरनभ्यासस्य** (६.१.८) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः | **एकाचो द्वे प्रथमस्य** (६.१.१) इत्यस्मात् **द्वे** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्—**श्लौ धातोः द्वे** |

द्वित्वम्

जुहोत्यादिगणे श्लुना सर्वेषां धातूनां द्वित्वं भवति | यथा दा → ददा, धा → दधा, भी → बिभी, हु → जुहु |

पाणिनीयव्याकरणे पञ्चसु स्थलेषु द्वित्वं भवति—श्लौ (जुहोत्यादिगणे), लिटि, चङि (लुङ्-लकारे), सनि, यङि च |

अत्रास्ति द्वित्वप्रकरणम्—

**एकाचो द्वे प्रथमस्य** (६.१.१)
**अजादेर्द्वितीयस्य** (६.१.२)
**न न्द्राः संयोगादयः** (६.१.३)
**पूर्वोऽभ्यासः** (६.१.४)
**उभे अभ्यस्तम्** (६.१.५)
**जक्षित्यादयः षट्** (६.१.६)
**तुजादीनां दीर्घोऽभ्यासस्य** (६.१.७)
**लिटि धातोरनभ्यासस्य** (६.१.८)
**सन्यङोः** (६.१.९)
**श्लौ** (६.१.१०)
**चङि** (६.१.११)
**दाश्वान्साह्वान्मीढ्वांश्च** (६.१.१२)

द्वित्वे जाते प्रथभागस्य नाम अभ्यासः, मिलित्वा द्वयोर्नाम अभ्यस्तम् |

**पूर्वोऽभ्यासः** (६.१.४) = द्वित्वानन्तरं, यस्मिन् द्विवारम् उच्चारणं जातं तस्मिन् प्रथमभागस्य नाम अभ्यासः | पूर्वः प्रथमान्तम्, अभ्यासः प्रथमान्तं, द्विपदमिदं सूत्रम् | **एकाचो द्वे प्रथमस्य** (६.१.१) इत्यस्मात् **द्वे** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **पूर्वः अभ्यासः द्वयोः** |

**उभे अभ्यस्तम्** (६.१.५) = द्वित्वानन्तरं, द्वयोः समुदायः अभ्यस्तसंज्ञको भवति | उभे प्रथमान्तम्, अभ्यस्तं प्रथमान्तं, द्विपदमिदं सूत्रम् | **एकाचो द्वे प्रथमस्य** (६.१.१) इत्यस्मात् **द्वे** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्—**उभे द्वे अभ्यस्तम्** |

अभ्यासकार्यम्

तत्र द्वित्वस्य अनन्तरं कानिचन कार्याणि सन्ति अभ्यासे; यथा अभ्यासस्य ह्रस्वत्वम्, अल्पप्राणत्वं च भवति | इदं सर्वम् अभ्यासकार्यम् इति उच्यते | आर्धधातुकप्रकरणे विस्तरेण परिशीलयाम (लिटि, लुङि, सनि, यङि इत्येषु) | अभ्यासयाकार्यस्य पुनः विभजनं भवति — सामान्याभ्यासकार्यं, विशेषाभ्यासकार्यं चेति | सामान्याभ्यासकार्यं भवति यत्र यत्र द्वित्वं भवति, सर्वेषां धातूनां कृते | विशेषाभ्यासकार्यं भवति द्वित्वस्य निमित्तम् अधिकृत्य; यथा लिटि विशेषाभ्यासकार्यं, पुनः श्लौ पृथक्तया, पुनः सनि, यङि, चङि च |

अत्र सन्ति प्रमुख–सामान्याभ्यासकार्याणि—
**ह्रस्वः** (७.४.५९)
**हलादिः शेषः** (७.४.६०)
**शर्पूर्वाः खयः** (७.४.६१)
**कुहोश्चुः** (७.४.६२)
**उरत्** (७.४.६६)
**अभ्यासे चर्च** (८.४.५४)

**ह्रस्वः** (७.४.५९) = अभ्यासस्य अच्–वर्णः ह्रस्वः स्यात् | **अचश्च** (१.२.२८) इति परिभाषा–सूत्रेण यत्र कुत्रापि सूत्रेषु 'ह्रस्व', 'दीर्घ', 'प्लुत' इत्येते शब्दाः आयान्ति, तत्र 'अचः' इति शब्दः सूत्रार्थेऽपि आयाति | अतः 'ह्रस्वः' इत्युक्तौ 'ह्रस्वः अच्–वर्णः'; तथा सर्वत्र | ह्रस्वः प्रथमान्तम्, एकपदमिदं सूत्रम् | **अत्र लोपोऽभ्यासस्य** (७.४.५८) इत्यस्मात् **अभ्यासस्य** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य अभ्यासस्य अचः ह्रस्वः** |

**हलादिः शेषः** (७.४.६०) = अभ्यासस्य आदिमः* हल् शेषः, अभ्यासे अपरेषां हलां लोपः | हल् प्रथमान्तम्, आदिः प्रथमान्तं, शेषः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अत्र लोपोऽभ्यासस्य** (७.४.५८) इत्यस्मात् **अभ्यासस्य** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— (**अङ्गस्य**) **अभ्यासस्य हलादिः शेषः** |

*आदिमः इत्युक्तौ 'आदौ यः', न तु 'प्रथमः' | अतः अजादिधातोः द्वित्वं क्रियते चेत्, आदौ अच्–वर्णः न तु हल्–वर्णः इति कारणतः **हलादिः शेषः** (७.४.६०) इत्यनेन अभ्यासे सर्वेषां हल्–वर्णानां लोपो भवति | अट् → अट् अट् → अ अट् |

**कुहोश्चुः** (७.४.६२) = अभ्यासे कवर्गीयस्य हकारस्य च स्थाने चवर्गीयादेशो भवति | तत्र **स्थानेऽन्तरतमः** (१.१.५०) इति परिभाषा–सूत्रेण, उच्चारणस्थानसाम्यवशात् हकारस्य स्थाने झकारः, तदा **अभ्यासे चर्च** (८.४.५४) इत्यनेन झ–स्थाने जकारः | कुश्च ह् च तयोरितरेतरद्वन्द्वः कुहौ, तयोः कुहोः | कुहोः षष्ठ्यन्तं, चुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **अत्र लोपोऽभ्यासस्य** (७.४.५८) इत्यस्मात् **अभ्यासस्य** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य अभ्यासस्य कुहोः चुः** |

**स्थानेऽन्तरतमः** (१.१.५०) = प्रसङ्गम् अवलम्ब्य तुल्यतमः आदेशो भवति | स्थाने सप्तम्यन्तम्, अन्तरतमः प्रथमान्तं, द्विपदमिदं सूत्रम् |

**उरत्** (७.४.६६) = प्रत्यये परे अभ्यासस्य ऋवर्णस्य स्थाने अत्–आदेशः भवति | उः षष्ठ्यन्तम्, अत् प्रथमान्तं, द्विपदमिदं सूत्रम् | **अत्र लोपोऽभ्यासस्य** (७.४.५८) इत्यस्मात् **अभ्यासस्य** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अङ्गस्य अभ्यासस्य उः अत्** |

**अभ्यासे चर्च** (८.४.५४) = अभ्यासे झल्–स्थाने जश् चर् च आदेशौ भवतः | तत्र **स्थानेऽन्तरतमः** (१.१.५०) इति परिभाषा–सूत्रेण, उच्चारणस्थानसाम्यवशात् झश्–स्थाने जश् अपि च खय्–स्थाने चर् | अनुवृत्त्यर्थम् अष्टमाध्याये | अभ्यासे सप्तम्यन्तं, चर् प्रथमान्तं, च अव्ययपदं, त्रिपदमिदं सूत्रम् | **झलां जश् झशि** (८.४.५३) इत्यस्मात् **झलां**, **जश्** इत्यनयोः अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्—**अभ्यासे झलां जश् चर् च संहितायाम्** |

अस्माभिः ज्ञायते यत् सार्वधातुकलकारेषु तिङन्तपदस्य निर्माणार्थं त्रीणि सोपानानि सन्ति |

१. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्, तदा धातु–विकरणप्रत्यययोः मेलनम्
२. तिङ्प्रत्यय–सिद्धिः
३. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनम्

जुहोत्यादिगणे अपि तथा, किन्तु द्वित्वम् अभ्यासकार्यं चापि स्तः; द्वित्वस्य निमित्तं श्लु, अभ्यासस्य निमित्तं यः प्रत्ययः अभ्यस्तात् परे अस्ति— तिङ् वा कृत् वा भवतु | तर्हि आहत्य जुहोत्यादिगणे कार्यस्य क्रमः एतादृशः—

- शप् विधीयते **कर्तरि शप्** इत्यनेन
- शपः स्थाने श्लु भवति
- **श्लौ** इत्यनेन धातोः द्वित्वं भवति
- सामन्य–अभ्यासकार्यम्; अभ्यस्तोत्तर–प्रत्ययः अस्य निमित्तम् (**ह्रस्वः**, **हलादिः शेषः**, **कुहोश्चुः**, **उरत्**, **अभ्यासे चर्च**)
- विशेष–अभ्यासकार्यम्; श्लुः अस्य निमित्तम्; चत्वारि सूत्राणि (अस्मिन् पाठे एकं— **निजां त्रयाणां गुणः श्लौ** (७.४.७५))
- अङ्गकार्यं, तिङ् च कृत् च निमित्तम्

१. <u>विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्, तदा धातु–विकरणप्रत्यययोः मेलनम्</u>

विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम् नास्ति यतः शप्–विकरणप्रत्ययस्य श्लुः भवति | श्लुः तु अङ्गकार्यस्य (अभ्यासकार्यस्य) निमित्तं भवति; तच्च तृतीये सोपाने क्रियते येन एकैकस्य धातोः चर्चा करणीया एकवारम् एव | तदर्थम् अभ्यासकार्यम् अपि तत्रैव |

२. <u>तिङ्प्रत्यय–सिद्धिः</u>

जुहोत्यादिगणे अङ्गम् अनदन्तम्, अतः अनदन्ताङ्गानां कृते सिद्ध–तिङ्प्रत्ययाः भवन्ति | परन्तु यत्र धातुः अभ्यस्तसंज्ञकः अस्ति, तत्र तिङ्प्रत्ययानां सिद्ध्यर्थं विशेषकार्यद्वयं वर्तते | जुहोत्यादिगणे सर्वे धातवः अभ्यस्तसंज्ञकाः, अत्र सर्वत्र इमे द्वे कार्ये स्तः—

१) **अदभ्यस्तात्** (७.१.४) = अभ्यस्तसंज्ञक–धातूत्तरस्य प्रत्ययस्य आदिमावयवस्य झकारस्य स्थाने अत्–आदेशो भवति | अत् प्रथमान्तम्, अभ्यस्तात् पञ्चम्यन्तं, द्विपदमिदं सूत्रम् | **झोऽन्तः** (७.१.३) इत्यस्मात् **झः** (षष्ठ्यन्तम्) इत्यस्य अनुवृत्तिः | **आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्** (७.१.२) इत्यस्मात्, वचनपरिणामं कृत्वा **प्रत्ययादेः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अभ्यस्तात् अङ्गात् प्रत्ययादेः झः अत्** |

धेयं यत् अत्–आदेशस्य तकारः **हलन्त्यम्** (१.३.३) इति सूत्रेण इत्–संज्ञकः न, यतोहि अत् तु विभक्तिसंज्ञक–झि–प्रत्ययस्य अवयवस्य आदेशः अतः **न विभक्तौ तुस्माः** (१.३.४) इत्यनेन **हलन्त्यम्** (१.३.३) बाधितम् |

**अदभ्यस्तात्** (७.१.४) इति सूत्रेण लटि लोटि च प्रथमपुरुषस्य बहुवचने झ्–स्थाने अत् आदेशः, अतः लटि झि → अति न तु अन्ति; लोटि झि → अतु न तु अन्तु |

२) **सिजभ्यस्तविदिभ्यश्च** (३.४.१०९) = ङित्–लकारस्य अवस्थायां, सिच्–प्रत्ययात्, अभ्यस्तसंज्ञकात् धातोः, विद्–धातोः च, परस्य झि–प्रत्ययस्य स्थाने जुस्–आदेशो भवति | सिच् च अभ्यस्तश्च विदिश्च तेषामितरेतरद्वन्द्वः सिजभ्यस्तविदयः, तेभ्यः सिजभ्यस्तविदिभ्यः | सिजभ्यस्तविदिभ्यः पञ्चम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **नित्यं ङितः** (३.४.९९) इत्यस्मात् **ङितः** इत्यस्य अनुवृत्तिः | **झेर्जुस्** (३.४.१०८) इत्यस्मात् **झेः जुस्** इत्यनयोः अनुवृत्तिः | **लस्य** (३.४.७७) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **सिजभ्यस्तविदिभ्यः च ङितः लस्य झेः जुस्** |

अनेन लङि अभ्यस्तसंज्ञकधातोः परस्य झि–स्थाने जुस्–आदेशः | जुस् इत्यस्य अनुबन्धलोपे, रुत्वविसर्गौ, उः इति भवति | तर्हि अभ्यस्तसंज्ञकः धातुः अस्ति चेत्, लङि अन्–स्थाने उः इति प्रत्ययः भवति |

अतः आहत्य अभ्यस्तसंज्ञक–धातूनां कृते, सार्वधातुकलकारेषु सिद्ध–तिङ्प्रत्ययाः एते | जुहोत्यादिगणे एते एव योजनीयाः—

<u>लट्–लकारः</u>

| <u>परस्मैपदम्</u> | | | <u>आत्मनेपदम्</u> | | |
|---|---|---|---|---|---|
| **ति** | तः | अति | ते | आते | अते |
| **सि** | थः | थ | से | आथे | ध्वे |
| **मि** | वः | मः | ए | वहे | महे |

लोट्–लकारः

| | | |
|---|---|---|
| **तु,** तात् | ताम् | अतु |
| हि, तात् | तम् | त |
| **आनि** | **आव** | **आम** |

| | | |
|---|---|---|
| ताम् | आताम् | अताम् |
| स्व | आथाम् | ध्वम् |
| **ऐ** | **आवहै** | **आमहै** |

लङ्–लकारः

| | | |
|---|---|---|
| **त्** | ताम् | उः |
| **स्** | तम् | त |
| **अम्** | व | म |

| | | |
|---|---|---|
| त | आताम् | अत |
| थाः | आथाम् | ध्वम् |
| इ | वहि | महि |

विधिलिङ्–लकारः

| | | |
|---|---|---|
| यात् | याताम् | युः |
| याः | यातम् | यात |
| याम् | याव | याम |

| | | |
|---|---|---|
| ईत | ईयाताम् | ईरन् |
| ईथाः | ईयाथाम् | ईध्वम् |
| ईय | ईवहि | ईमहि |

प्रत्ययादेशः

क्वचित् विशिष्ट–स्थित्याम् एषु सिद्ध–तिङ्प्रत्ययेषु केचन परिवर्तन्ते | अयं विकारः प्रत्ययादेशः इति उच्यते |

परस्मैपदस्य लोटि—

**हुझल्भ्यो हेर्धिः** (६.४.१०१) = हु–धातुतः झलन्तेभ्यः धातुभ्यश्च हि–प्रत्ययस्य स्थाने धि–आदेशो भवति | **येनविधिस्तदन्तस्य** (१.१.७२) इत्यनेन झलेभ्यः इति विशेषणेन तेभ्यः अङ्गेभ्यः येषाम् अन्ते झल् | हुश्च झलश्च तेषामितरेतरद्वन्द्वो हुझलः, तेभ्यो हुझल्भ्यः | हुझल्भ्यः पञ्चम्यन्तं, हेः षष्ठ्यन्तं, धिः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.११) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम् — **हुझल्भ्यः अङ्गेभ्यः हेः धिः** |

परस्मैपदस्य लङि—

**अपृक्त एकाल् प्रत्ययः** (१.२.४१) = यस्य प्रत्यस्य एकैव अल्, तस्य अपृक्त–संज्ञा भवति | एकश्चासौ अल् एकाल्, कर्मधारयः | अपृक्तः प्रथमान्तम्, एकाल् प्रथमान्तं, प्रत्ययः प्रथमान्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **एकाल् प्रत्ययः अपृक्तः** |

**हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) = हलन्तात्, दीर्घङ्यन्तात्, दीर्घाबन्तात् च सु–ति–सि इत्येषाम् अपृक्तसंज्ञकस्य हलः लोपः | अनेन प्रथमाविभक्तौ सु इत्यस्य स्–लोपः, लङि प्रथमपुरुषे त्–लोपः, मध्यमपुरुषे स्–लोपश्च | हल् च ङी च आप् च तेषाम् इतरेतरद्वन्द्वः हल्ङ्यापः, तेभ्यः हल्ङ्याब्भ्यः | सुश्च, तिश्च, सिश्च तेषां समाहारद्वन्द्वः, सुतिसि, सुतिसिनः अपृक्तं सुतिस्यपृक्तम् | हल्ङ्याब्भ्यः पञ्चम्यन्तं, दीर्घात् पञ्चम्यन्तं, सुतिस्यपृक्तं प्रथमान्तं, हल् प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **लोपो व्योर्वलि** (६.१.६५) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः; अत्र कर्मणि प्रयोगे **लुप्यते** इति रूपविकारः | अनुवृत्ति–सहितसूत्रम्— **दीर्घात् हल्ङ्याब्भ्यो सुतिसि अपृक्तं हल् लुप्यते** |

३. तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनम्

अस्मिन सोपाने सर्वप्रथमं तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यम् | तदा एव सन्धिकार्यम् |

a) अङ्गकार्यम्

अङ्गकार्ये किं किं सम्भवति इति एकवारं चिन्तनीयम् | अस्मिन् पाठे सर्वे धातवः हलन्ताः, अतः **सार्वधातुकार्धधातुकयोः** इत्यस्य प्रसक्तिः नास्त्येव | स्मर्यतां, सूत्रार्थः एवम्—इगन्त–धातोः अनन्तरं सार्वधातुकप्रत्ययः अथवा आर्धधातुकप्रत्ययः अस्ति चेत्, तर्हि इगन्तस्य अङ्गस्य गुणः भवति | यथा भू + शप् → भो + शप् → भो + अ | तादृशकार्यम् अस्मिन् पाठे न कुत्रापि भविष्यति यतोहि धातुः हलन्तः; इगन्तधातुः अत्र नैव भवति | परन्तु अस्मिन् पाठे कुत्रचित् उपधायां लघु इक् वर्तते, अतः तादृशेषु स्थलेषु **पुगन्तलघूपधस्य च** इत्यनेन उपधायां गुणकार्यम् | यथा दिधिष् + ति → **पुगन्तलघूपधस्य च** → दिधेष् + ति → सन्धिकार्यम् →

दिधेष्टि | अन्यच्च क्वचित् विशिष्टधातूनां विशेषाङ्गकार्यं भवति | यथा भस–धातौ **घसिभसोर्हलिच** (६.४.१००) इत्यनेन उपधा लोपः (अधः दृश्यताम्) |

b) सन्धिकार्यम्

यदा तिङ्प्रत्यय–निमित्तकम् अङ्गकार्यं समाप्तं, तदा अङ्ग–तिङ्प्रत्यययोः मेलनं क्रियते | यदा मेलनं भवति, तदा कस्यचित् सन्धिकार्यस्य प्राप्तिरस्ति चेत्, अस्मिन् समये क्रियताम् | अधुनैव पूर्वतनेषु हल्–सन्धि–पाठेषु यत् हल्–सन्धिकार्यम् अधीतं, तत् साधनीयम् | कानिचन प्रसिद्धसूत्राणि मनसि स्युः—

सर्वेषु लकारेषु इमानि अधःस्थानि सूत्राणि प्रवर्तन्ते | धेयं यत् इमानि सर्वाणि त्रिपाद्यां सन्ति, अतः पूर्वत्रासिद्धम् इत्यनेन पूर्वसूत्रं चेत् पूर्वकार्यम्, अपि च परसूत्रं चेत् परकार्यम् | नाम यत् सूत्रं सङ्ख्या–क्रमेण प्रथमं आयाति, तस्य कार्यं पूर्वं भवति | अतः सूत्र–क्रमेण सर्वाणि दर्शितानि अत्र—

– **संयोगान्तस्य लोपः** (८.२.२३) = यस्य पदस्य अन्ते संयोगोऽस्ति, तस्य पदस्य अन्तिमवर्णस्य लोपो भवति | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य एव लोपः न तु पूर्णपदस्य | संयोगः अन्ते अस्ति यस्य तत् संयोगान्तं, बहुव्रीहिः, तस्य संयोगान्तस्य | संयोगान्तस्य षष्ठ्यन्तं, लोपः प्रथमान्तं, द्विपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **संयोगान्तस्य पदस्य लोपः** |
– **धि च** (८.२.२५) = सकारस्य लोपो भवति धकारादि–प्रत्यये परे | धि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **रात्सस्य** (८.२.२४) इत्यस्मात् **सस्य** इत्यस्य अनुवृत्तिः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **धि च सस्य लोपः** |
– **स्कोः संयोगाद्योरन्ते च** (८.२.२९) = संयोगस्य प्रथमसदस्यः सकारः ककारः वा चेत्, संयोगस्य प्रथमसदस्यलोपो भवति न तु द्वितीयसदस्यस्य, झलि पदान्ते च | स् च क् च तयोरितरेतरद्वन्द्वः स्कौ, तयोः स्कोः | संयोगस्य आदि संयोगादि, तयोः संयोगाद्योः, षष्ठीतत्पुरुषः | **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **संयोगाद्योः स्कोः लोपः झलि पदस्य अन्ते च** |
– **चोः कुः** (८.२.३०) = चवर्गस्य स्थाने कवर्गादेशो भवति पदान्ते झलि च | चोः षष्ठ्यन्तं, कुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **चोः कुः झलि पदस्य अन्ते च** |
– **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) = व्रश्च्, भ्रस्ज्, सृज्, मृज्, यज्, राज्, भ्राज्, छकारान्ताः शकारान्ताः चैषां धातूनाम् अन्तिमवर्णस्य स्थाने षकारादेशो भवति झलि पदान्ते च | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तिमवर्णस्य एव स्थाने षकारादेशः, न तु पूर्णपदस्य | व्रश्चश्च भ्रस्जश्च सृजश्च मृजश्च यजश्च राजश्च भ्राजश्च छश्च श् च तेषामितरेतरद्वन्द्वः व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशः, तेषां व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशाम् | व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षष्ठ्यन्तं, षः प्रथमान्तं, द्विपदमिदं सूत्रम् | अत्र '**जच्छशां**' इति भागे **छे च** (६.१.७३) इत्यनेन तुक्–आगमे सति जत्छशां, तदा श्चुत्वसन्धौ जच्छशां | **झलो झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः झलि पदस्य अन्ते च** |
– **झलां जशोऽन्ते** (८.२.३९) = पदान्ते झलः स्थाने जशादेशो भवति | पदात् परे कोऽपि वर्णः स्यात् वा न वा, सूत्रस्य प्रसक्तिः अस्ति एव | पदात् परे अच् स्यात् हल् स्यात् वा, सूत्रस्य प्रसक्तिः अस्ति एव | बाधकसूत्रम् अस्ति चेत् अन्या वार्ता | झल् प्रत्याहारे पञ्चमवर्गीय–व्यञ्जनानि वर्जयित्वा सर्वाणि वर्गीयव्यञ्जनानि (नाम अननुनासिक–वर्गीयव्यञ्जनानि), अपि च श्, ष्, स्, ह् | प्रयोगे वर्गाणां प्रथमः, द्वितीयः, तृतीयः, चतुर्थश्च वर्णाः आयान्ति | जश् प्रत्याहारे वर्गाणां तृतीयवर्णः—ज्, ब्, ग्, ड्, द् इति | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन कवर्गीयाणां स्थाने गकारः, चवर्गीयाणां स्थाने जकारः, तवर्गीयाणां स्थाने दकारः, टवर्गीयाणां स्थाने डकारः, पवर्गीयाणां स्थाने बकारः इति | झलां षष्ठ्यन्तं, जशः प्रथमान्तम्, अन्ते सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः || तर्हि पदस्य अन्ते झल्–प्रत्याहारे कश्चन वर्णः अस्ति चेत्, स्थाने तस्य वर्गस्य तृतीयवर्णादेशः भवति | अयं जश्त्वसन्धिः इत्युच्यते | अनुवृत्ति–सहितसूत्रम्— **पदस्य अन्ते झलां जशः** |
– **षढोः कः सि** (८.२.४१) = सकारे परे षकारस्य ढकारस्य च ककारादेशो भवति | षश्च ढश्च तयोः इतरेतरद्वन्द्वः षढौ, तयोः षढोः | षढोः षष्ठ्यन्तं, कः प्रथमान्तं, सि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णम्— **षढोः कः सि** |
– **नश्चापदान्तस्य झलि** (८.३.२४) = अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारादेशो भवति झलि परे | झल्–प्रत्याहारे वर्गस्य प्रथमः, द्वितीयः, तृतीयः, चतुर्थः च वर्णाः अपि च श्, ष्, स्, ह् इति वर्णाः अन्तर्भूताः | पदस्य अन्तः पदान्तः, न पदान्तः

अपदान्तः तस्य अपदान्तस्य | नः षष्ठ्यन्तं, च अव्ययपदम्, अपदान्तस्य षष्ठ्यन्तं, झलि सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **मोऽनुस्वारः** (८.३.२३) इत्यस्मात् **मः**, **अनुस्वारः** इत्यनयोः अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अपदान्तस्य मः नः च अनुस्वारः झलि संहितायाम्** |

– **आदेशप्रत्यययोः** (८.३.५९) = इण्–प्रत्याहारात् कवर्गीयात् च परे अपदान्तः आदेशरूपी प्रत्ययावयवो वा सकारः अस्ति चेत्, तस्य सकारस्य स्थाने षकारादेशो भवति | आदेशः तु मूर्धन्यवर्णस्य इत्येव उक्तं, परं **स्थानेऽन्तरतमः** इत्यनेन ट्, ठ्, ड्, ढ्, ण्, ष् इत्येषु मूर्धन्यवर्णेषु षकारस्य नैकट्यम्, अतः षकारः एव आदिष्टः भवति | नुम्, विसर्गः, शृ–प्रत्याहारस्थ–वर्णः एषु अन्यतमः मध्ये अस्ति चेदपि कार्यं भवति | इण्–प्रत्याहरे इमे वर्णाः अन्तर्भूताः— इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह, य, व, र, ल | अस्य कार्यस्य नाम षत्वविधिः | आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ, तयोः आदेशप्रत्यययोः इतरेतरद्वन्द्वः | षष्ठ्यन्तम् एकपदमिदं सूत्रम् | **सहे साडः सः** (८.३.५६) इत्यस्मात् **सः** इत्यस्य अनुवृत्तिः | **नुंविसर्जनीयशर्व्यवायेऽपि** (८.३.५८) इत्यस्य पूर्णा अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | **इण्कोः** (८.३.५७), **अपदान्तस्य मूर्धन्यः** (८.३.५५) इत्यनयोः अधिकारः | अनुवृत्ति–सहितसूत्रम्—**इण्कोः आदेशप्रत्यययोः अपदान्तस्य सः मूर्धन्यः संहितायां, नुंविसर्जनीयशर्व्यवायेऽपि** |

– **रषाभ्यां नो णः समानपदे** (८.४.१) = रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति, समानपदस्थौ चेदेव निमित्तनिमित्तिनौ भवतः |

– **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) = अट्, कवर्गः, पवर्गः, आङ्, नुम् इत्येतैः यथासम्भवं मिलितैः व्यवधानेऽपि नस्य णः स्यात् समानपे | **रषाभ्यां नो णः समानपदे** (८.४.१) इति सूत्रस्य पूर्णतया अनुवृत्तिः |

– **ष्टुना ष्टुः** (८.४.४१) = दन्त्यसकारस्य तवर्गीयवर्णस्य च स्थाने मूर्धन्यषकारादेशः टवर्गीयवर्णादेशश्च भवतः, मूर्धन्यषकार–टवर्गीयवर्णयोः योजनेन |

– **झलां जश् झशि** (८.४.५३) = झलां स्थाने जशादेशो भवति झशि परे | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन जश्–वर्णेषु वर्णनिर्धारणम् | झलां षष्ठ्यन्तं, जशः प्रथमान्तम्, झशि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | झश्–प्रत्याहारे वर्गाणां तृतीयचतुर्थाः च वर्णाः अन्तर्भूताः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **झलां जश् झशि संहितायाम्** |

– **खरि च** (८.४.५५) = झलः स्थाने चरादेशो भवति खरि परे | खरि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **झलां जश् झशि** (८.४.५३) इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः; **अभ्यासे चर्च** (८.४.५४) इत्यस्मात् **चर्च** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **झलां चर् खरि च संहितायाम्** |

– **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) = अनुस्वारस्य स्थाने परसवर्णादेशो भवति ययि परे | परस्य सवर्णः, परसवर्णः, षष्ठी तत्पुरुषः | अनुस्वारस्य षष्ठ्यन्तं, ययि सप्तम्यन्तं, परसवर्णः प्रथमान्तं, त्रिपदमिदं सूत्रम् | यय्–प्रत्याहारे श्, ष्, स्, ह् एतान् वर्जयित्वा सर्वे हल्–वर्णाः अन्तर्भूताः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अनुस्वारस्य ययि परसवर्णः संहितायाम्** |

– **वाऽवसाने** (८.४.५६) = अवसाने झलः विकल्पेन चर्–आदेशो भवति | अनेन अवसानावस्थायां विकल्पेन जश्त्वं चर्त्वं वा | वा अव्ययपदम्, अवसाने सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **झलां जश् झशि** (८.४.५३) इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः | **अभ्यासे चर्च** (८.४.५४) इत्यस्मात् **चर्** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अवसाने झलां चरो वा** |

– **झरो झरि सवर्णे** (८.४.६५) = हल्–उत्तरस्य झरः विकल्पेन लोपः सवर्णझरि परे | झरः षष्ठ्यन्तं, झरि सप्तम्यन्तं, सवर्णे सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **हलो यमां यमि लोपः** (८.४.६४) इत्यस्मात् **हलः**, **लोपः** चेत्यनयोः अनुवृत्तिः | **झयो होऽन्यतरस्याम्** (८.४.६२) इत्यस्मात् **अन्यतरस्याम्** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **हलः झरः लोपः अन्यतरस्यां सवर्णे झरि संहितायाम्** |

एषां प्रसक्तिर्यत्र यत्र भवति, तत्र तत्र अस्माभिः तत्तत् सन्धिकार्यं करणीयमेव | अनेन हलन्तधातवः द्रष्टव्याः | धेयं यत् पूर्वतनेषु हल्–सन्धि–पाठेषु, हल्–सन्धयः परिशीलिताः केन क्रमेण ? प्रत्ययस्य प्रथमवर्णम् अनुसृत्य | अधुना अस्माकं कार्यं प्रवर्तते धातोः अन्तिमवर्णम् अनुसृत्य | कार्यं तदेव, परन्तु धातुक्रमेण अग्रे सरेम—

जुहोत्यादिगणस्य अष्टसु हलन्तधातुषु त्रयः अदुपधधातवः, चत्वारः इदुपधधातवः, एकः उदुपधधातुः चेति |

1. <u>अदुपधधातवः</u>

त्रयः अदुपधधातवः सन्ति—भस → भस्, धन → धन्, जन → जन् इति |

<u>भस → भस् धातुः</u> (परस्मैपदी, भत्सनदीप्त्योः)

a. द्वित्वम्, अभ्यासकार्यं च—
भस् → **श्लौ** → भस्-भस् → **हलादिः शेषः** → भभस् → **अभ्यासे चर्च** → बभस् इति अङ्गम्

b. अङ्गकार्यम्—
१) हलादि पित्सु = उपधायाम् अकारः (लघु इक् इति न) अतः किमपि कार्यं नास्ति | बभस् + ति → बभस्ति
२) अजादि पित्सु = उपधायाम् अकारः (लघु इक् इति न) अतः किमपि कार्यं नास्ति | बभस् + आनि → बभसानि
३) हलाद्यपित्सु = **घसिभसोर्हलिच** इत्यनेन उपधायाः लोपः | बभस् + तः → बभ्स् + तः → सन्धिकार्यम् → बब्धः
४) अजाद्यपित्सु = **घसिभसोर्हलिच** इत्यनेन उपधायाः लोपः | बभस् + अति → बभ्स् + अति → सन्धिकार्यम् → बप्सति

**घसिभसोर्हलिच** (६.४.१००) = छन्दसि घस् भस् अनयोः उपधायाः लोपो भवति अजादौ हलादौ च क्ङिति प्रत्यये परे | 'अजादौ हलादौ च' उक्तं यतोहि 'अजादिप्रत्यये परे' इति पूर्वतनसूत्रेषु प्रवर्तमानम्; अत्र हलादिप्रत्यये परेऽपि इति कृत्वा द्वयम् उकम् | घसिभसोः षष्ठ्यन्तं, हलि सप्तम्यन्तं, च अव्ययपदं, त्रिपदमिदं सूत्रम् | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः; **ऊदुपधाया गोहः** (६.४.८९) इत्यस्मात् **उपधायाः** इत्यस्य अनुवृत्तिः | **गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) इत्यस्मात् **लोपः**, **क्ङिति** इत्यनयोः अनुवृत्तिः | **तनिपत्योश्छन्दसि** (६.४.९९) इत्यस्मात् **छन्दसि** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **घसिभसोः अङ्गस्य उपधायाः लोपः अचि हलि च क्ङिति |**

c. सन्धिकार्यम्—

बभस् + तः → **घसिभसोर्हलिच** (६.४.१००) → बभ्स् + तः → **झलो झलि** (८.२.२६) → बभ् + तः → **झषस्तथोर्धोऽधः** → बभ् + धः → **झलां जश् झशि** → बब् + धः → बब्धः

बभस् + अति → **घसिभसोर्हलिच** (६.४.१००) → बभ्स् + अति → **खरि च** इत्यनेन चर्त्वम् → बप्सति

धेयं यत् अत्र 'अति' झलादिः नास्ति अतः स्-लोपो न भवति | वकारादिः मकारादिश्च प्रत्ययाः अपि तथा— बभस् + वः → बप्स्वः |

**झलो झलि** (८.२.२६) = झल्-उत्तरस्य सकारस्य लोपो भवति झलि परे | झलः पञ्चम्यन्तं, झलि सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **रात्सस्य** (८.२.२४) इत्यस्मात् **सस्य** इत्यस्य अनुवृत्तिः, **संयोगान्तस्य लोपः** (८.२.२३) इत्यस्मात् **लोपः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **झलः सस्य लोपः झलि** |

बभस् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यनेन झलन्तेभ्यः धातुभ्यश्च हि-प्रत्ययस्य स्थाने धि-आदेशः → बभस् + धि → **घसिभसोर्हलिच** (६.४.१००) इत्यनेन भस्-धातोः उपधालोपः अजादौ हलादौ च क्ङिति प्रत्यये परे → बभ्स् + धि → **खरि च** (८.४.५५) च **झलो झलि** (८.२.२६) इति द्वे सूत्रे असिद्धे **धि च** (८.२.२५) इति सूत्रं प्रति → **धि च** (८.२.२५) इत्यनेन सकारस्य लोपो भवति धकारादि-प्रत्यये परे → बभ् + धि → **झलां जश् झशि** (८.४.५३) इत्यनेन झलां स्थाने जशादेशो भवति झशि परे → बब्धि

भस्-धातोः तिङन्तरूपाणां चिन्तनार्थं समूहत्रयं वर्तते— १) प्रत्ययः पित् (तत्र उपधालोपो न भवति); २) प्रत्ययः अपित्, झलादिः (उपधालोपो भवति, स्-लोपो भवति); ३) प्रत्ययः अपित्, किन्तु झलादिः न (उपधालोपो भवति, स्-लोपो न भवति) |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—

लङि—
विधिलिङि—

प्रश्नः उदेति **घसिभसोर्हलिच** (६.४.१००) इति सूत्रे घस्–धातोः प्रसङ्गः कः ? घसॢ अदने (खादनार्थे) इति धातुः भ्वादिगणीयः, लटि घसति | **इक्श्तिपौ धातुनिर्देशे इति वक्तव्यम्** (३.३.१०८ अन्तर्गते) इति वार्त्तिकेन, धातु–निर्देशे इक्–प्रत्ययो भवति | अनेन घसॢ + इक् → घस् + इ → घसि इति रूपं धात्वर्थे एव |

घस्–धातोः उदाहरणं घस् + क्तिन् → सग्धिः | प्रक्रिया एतादृशी—

घसॢ + क्तिन् → घस् + ति → **घसिभसोर्हलिच** (६.४.१००) इत्यनेन उपधा–लोपः → घ् + स् + ति → **झलो झलि** (८.२.२६) इत्यनेन स्–लोपः → घ् + ति → **झषस्तथोर्धोऽधः** (८.२.४०) इत्यनेन त्–स्थाने ध्–आदेशः → घ् + धि → **झलां जश् झशि** (८.४.५३) इत्यनेन जश्त्वम् → ग् + धि → ग्धि → 'समाना ग्धिः' इत्यस्मिन् अर्थे समासे सति **समानस्यच्छन्दस्यसूर्धप्रभृत्युदर्केषु** (६.३.८४) इत्यनेन समानार्थे 'स' इति आगमः → सग्धिः | 'सग्धिः स्त्री सहभोजनम्' अमरकोषम् (२.९.५५) अनुसृत्य सहभोजनार्थे प्रयोगो भवति |

<u>धन → धन् धातुः</u> (परस्मैपदी, धान्ये, छान्दसः)

a. द्वित्वम्, अभ्यासकार्यं च—
धन् → **श्लौ** → धन्–धन् → **हलादिः शेषः** → धधन् → **अभ्यासे चर्च** → दधन् इति अङ्गम्

b. अङ्गकार्यम्— उपधायाम् अकारः (लघु इक् इति न) अतः गुणकार्यं नास्ति | परन्तु विशिष्टम् अङ्गकार्यं वर्तते, **अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) इत्यनेन उपधादीर्घादेशः झलादि कित्ङित्–प्रत्यये परे—

दधन् + तः → **अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) इत्यनेन उपधायाः दीर्घादेशः → दधान् + तः → **नश्चापदान्तस्य झलि**, **अनुस्वारस्य ययि परसवर्णः** → दधान्तः

**अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) = अनुनासिकान्ताङ्गस्य उपधायाः दीर्घादेशो भवति क्वि च झलादि कित्ङित्–प्रत्यये परे | क्विश्च झल् तयोरितरेतरद्वन्द्वः क्विझलौ, तयोः क्विझलोः | क् च ङ् तयोरितरेतरद्वन्द्वः क्ङौ, तौ इतौ यस्य तत् क्ङित्, तस्मिन् क्ङिति | अनुनासिकस्य षष्ठ्यन्तं, क्विझलोः सप्तम्यन्तं, क्ङिति च सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **नोपधायाः** (६.४.७) इत्यस्मात् **उपधायाः** इत्यस्य अनुवृत्तिः | **ढ्रलोपे पूर्वस्य दीर्घोऽणः** (६.३.१११) इत्यस्मात् **दीर्घः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते अनुनासिकवर्णः अस्ति; **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन **क्विझलोः क्ङिति** इत्युक्तौ क्वि + झलादौ क्ङिति (तादृशप्रत्ययः यस्य आदौ झल् स्यात्) |
अनुवृत्ति–सहितसूत्रम्— **अनुनासिकस्य अङ्गस्य उपधायाः दीर्घः क्विझलोः क्ङिति** |

धेयं यत् सिद्धान्तकौमुद्यां रूपं दत्तमस्ति 'दधन्तः' | माताजी वदति यत् इदं रूपं दोषाय; **अनुनासिकस्य क्विझलोः क्ङिति** (६.४.१५) इत्यस्य कार्यम् अत्र भवेदेव |

c. सन्धिकार्यम्—
नकारान्तधातुः मकारान्तधातुः वा चेत्, स च धातुः अनुनासिकान्तधातुरिति उच्यते |

दधन् + ति → **नश्चापदान्तस्य झलि** → दधं + ति → **अनुस्वारस्य ययि परसवर्णः** → दधन्ति
दधन् + सि → **नश्चापदान्तस्य झलि** → दधं + सि → दधंसि

धेयं यत् दधन् नकारान्तम् अङ्गम्; नकारः झलि नास्ति अतः लोटि हि–स्थाने धि–आदेशो न भवति |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

रूपाणि
लटि —
लोटि—
लङि—
विधिलिङि—

जन → जन् धातुः (परस्मैपदी, जनने, छान्दसः)

a. द्वित्वम्, अभ्यासकार्यं च—
जन् → **श्लौ** → जन्-जन् → **हलादिः शेषः** → जजन् इति अङ्गम्

b. अङ्गकार्यम्—
१) हलादि पित्सु = उपधायाम् अकारः (लघु इक् इति न) अतः किमपि कार्यं नास्ति | जजन् + ति → जजन्ति
२) अजादि पित्सु = उपधायाम् अकारः (लघु इक् इति न) अतः किमपि कार्यं नास्ति | जजन् + आनि → जजनानि
३) हलाद्यपित्सु = **जनसनखनां सञ्झलोः** इत्यनेन झलि नकारस्य आकारादेशः | जजन् + तः → जजा + तः → जजातः
४) अजाद्यपित्सु = **गमहनजनखनघसां लोपः क्ङित्यनङि** इत्यनेन उपधायाः लोपः | जजन् + अति → जज्न् + अति → सन्धिकार्यम् → जज्ञति

**जनसनखनां सञ्झलोः** (६.४.४२) = जन्, सन्, खन् एषां धातूनां नकारस्य स्थाने आकारादेशो भवति झलादि-सन्-प्रत्यये परे झलादि-कित्ङित्-प्रत्यये परे च | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य साहाय्येन आकारादेशः पूर्णतया धातोः स्थाने न, अपि तु अन्तिमस्य नकारस्य | जनश्च सनश्च खन् च तेषमितरेतरद्वन्द्वः जनसनखनः, तेषां जनसनखनाम् | सन् च झल् च तयोरितरेतरद्वन्द्वः सञ्झलौ, तयोः सञ्झलोः | जनसनखनां षष्ठ्यन्तं, सञ्झलोः सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **विड्वनोरनुनासिकस्यात्** (६.४.४१) इत्यस्मात् **आत्** इत्यस्य अनुवृत्तिः, **अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** (६.४.३७) इत्यस्मात् **झलि**, **क्ङिति** इत्यनयोः अनुवृत्तिः | **झलि** इति अनुवृत्तिः **सन्** इत्यस्य विशेषणम्; अनेन यत्र सनि इडागमो भवति, तत्र सन् झलादिः नास्ति अतः नकारस्य आत्वं न भवति | सूत्रे स्थितं 'झलि' तु क्ङिति इत्यस्य विशेषणम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **जनसनखनाम् अङ्गानाम् आत् झलि सञ्झलोः क्ङिति** |

**गमहनजनखनघसां लोपः क्ङित्यनङि** (६.४.९८) = गम्, हन्, जन्, खन्, घस् एषां धातूनाम् उपधायाः लोपो भवति अजादि-कित्ङित्-प्रत्यये परे, परन्तु अङ्-प्रत्ययः चेत् लोपः न भवति | गमश्च हनश्च जनश्च खनश्च घस् च तेषामितरेतरद्वन्द्वो गमहनजनखनघसः, तेषां गमहनजनखनघसाम् | क् च ङ् च क्ङौ, क्ङौ इतौ यस्य सः क्ङित्, तस्मिन् क्ङिति | न अङ् अनङ्, तस्मिन् अनङि | गमहनजनखनघसां षष्ठ्यन्तं, लोपः प्रथमान्तं, क्ङिति सप्तम्यन्तम्, अनङि सप्तम्यतम् अनेकपदमिदं सूत्रम् | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः; **ऊदुपधाया गोहः** (६.४.८९) इत्यस्मात् **उपधायाः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **गमहनजनखनघसाम् अङ्गानाम् उपधायाः लोपः अनङि अचि क्ङिति** |

विधिलिङि—
अस्मिन् लकारे सर्वे प्रत्ययाः यकारादयः | यकारः झलि नास्ति अतः **जनसनखनां सञ्झलोः** इत्यनेन नकारस्य स्थाने आकारादेशो न भवति | परन्तु **ये विभाषा** इत्यनेन विकल्पेन आकारादेशो विहितः |

**ये विभाषा** (६.४.४३) = जन्, सन्, खन् एषां धातूनां नकारस्य स्थाने विकल्पेन आकारादेशो भवति यकारादि-कित्ङित्-प्रत्यये परे | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्तादेशः | ये सप्तम्यन्तं, विभाषा प्रथमान्तं, द्विपदमिदं सूत्रम् | **जनसनखनां सञ्झलोः** (६.४.४२) इत्यस्मात् **जनसनखनाम्** इत्यस्य अनुवृत्तिः | **विड्वनोरनुनासिकस्यात्** (६.४.४१) इत्यस्मात् **आत्** इत्यस्य अनुवृत्तिः | **अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** (६.४.३७) इत्यस्मात् **क्ङिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **जनसनखनां अङ्गस्य आत् ये क्ङिति विभाषा** |

जजन् + यात् → **ये विभाषा** → जजन् / जजा + यात् → जजन्यात् / जजायात्

c. सन्धिकार्यम्—
नकारान्तधातुः मकारान्तधातुः वा चेत्, स च धातुः अनुनासिकान्तधातुरिति उच्यते |

जजन् + ति → **नश्चापदान्तस्य झलि** → जजं + ति → **अनुस्वारस्य ययि परसवर्णः** → जजन्ति
जजन् + सि → **नश्चापदान्तस्य झलि** → जजं + सि → जजंसि
जजन् + अति → **गमहनजनखनघसां लोपः क्ङित्यनङि** → जज्न् + अति → **स्तोः श्चुना श्चुः** इत्यनेन श्चुत्वम् → जज्ञ् + अति → ज्ञ् = ज्ञ् → जज्ञति

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

2. <u>इदुपधधातवः</u>

चत्वारः इदुपधधातवः सन्ति— धिष → धिष्, णिजिर् → निज्, विजिँ → विज्, विष्लृ → विष् |

<u>धिष → धिष् धातुः</u> (परस्मैपदी, शब्दे, छान्दसः)

a. द्वित्वम्, अभ्यासकार्यं च—
धिष् → **श्लौ** → धिष्-धिष् → **हलादिः शेषः** → धिधिष् → **अभ्यासे चर्च** → दिधिष् इति अङ्गम्

b. अङ्गकार्यम्—

१) हलादि पित्सु = उपधायां लघु-इकः गुणः | दिधिष् + ति → **पुगन्तलघूपधस्य च** → दिधेष् + ति → दिधेष्टि
२) अजादि पित्सु = **नाभ्यस्तस्याचि पिति सार्वधातुके** इत्यनेन उपधायां लघु-इकः गुणनिषेधः | दिधिष् + आनि → **रषाभ्यां नो णः समानपदे** इत्यनेन णत्वम् → दिधिषाणि
३) हलाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | दिधिष् + तः → दिधिष्टः
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | दिधिष् + अति → दिधिषति

**नाभ्यस्तस्याचि पिति सार्वधातुके** (७.३.८७) = अभ्यस्तस्य लघूपधगुणः न भवति अजादि-पित्-सार्वधातुकप्रत्यये परे | न अव्ययपदम्, अभ्यस्तस्य षष्ठ्यन्तम्, अचि सप्तम्यन्तं, पिति सप्तम्यन्तं, सार्वधातुके सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् |
**पुगन्तलघूपधस्य च** (७.३.८६) इत्यस्मात् **लघूपधस्य** इत्यस्य अनुवृत्तिः, **मिदेर्गुणः** (७.३.८२) इत्यस्मात् **गुणः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अभ्यस्तस्य अङ्गस्य लघूपधस्य गुणः न अचि पिति सार्वधातुके** |

c. सन्धिकार्यम्—

दिधिष् + ति → **पुगन्तलघूपधस्य च** → दिधेष् + ति → **ष्टुना ष्टुः** → दिधेष्टि
दिधिष् + सि → **पुगन्तलघूपधस्य च** → दिधेष् + सि → **षढोः कः सि** → दिधेक् + सि → **आदेशप्रत्यययोः** → दिधेक्षि
दिधिष् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → दिधिष् + धि → **ष्टुना ष्टुः** (८.४.४१) → दिधिष् + ढि → **झलां जश् झशि** (८.४.५३) → दिधिड् + ढि → दिधिड्ढि

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>निजाद्यन्तर्गणः</u>

णिजिर् → निज्, विजिर् → विज्, विष्लृ → विष् एते त्रयः धातवः निजादयः |

<u>णिजिर् → निज् धातुः</u> (उभयपदी, शौचपोषणयोः)

a. द्वित्वम्, अभ्यासकार्यं च—

निज् → **श्लौ** → निज्-निज्→ **हलादिः शेषः** → निनिज् इति अङ्गम्

अत्र किञ्चन विशिष्टं सूत्रम् आयाति **निजां त्रयाणां गुणः श्लौ**, येन अभ्यासे गुणो भवति | श्लु-निमित्तीकृत्य इदं कार्यं भवति, अतः सर्वेषु रूपेषु प्रसक्तिरस्ति; पित्त्वम् अपित्त्वम् इत्यनयोर्न कोऽपि सम्बन्धः |

निनिज् → **निजां त्रयाणां गुणः श्लौ** इत्यनेन अभ्यासे गुणः → नेनिज् इति नूतनाङ्गम्

**निजां त्रयाणां गुणः श्लौ** (७.४.७५) = निजादीनां त्रयाणाम् अभ्यासस्य गुणो भवति, श्लौ | निज्, विज्, विष् इत्येषां प्रसङ्गः | निजां षष्ठ्यन्तं, त्रयाणां षष्ठ्यन्तं, गुणः प्रथमान्तं, श्लौ सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **अत्र लोपोऽभ्यासस्य** (७.४.५८) इत्यस्मात् **अभ्यासस्य** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **निजां त्रयाणां अङ्गस्य अभ्यासस्य गुणः श्लौ** |

b. अङ्गकार्यम्—

१) हलादि पित्सु = उपधायां लघु-इकः गुणः | नेनिज् + ति → **पुगन्तलघूपधस्य च** → नेनेज् + ति → सन्धिकार्यम् → नेनेक्ति
२) अजादि पित्सु = **नाभ्यस्तस्याचि पिति सार्वधातुके** इत्यनेन उपधायां लघु-इकः गुणनिषेधः | नेनिज् + आनि → नेनिजानि
३) हलाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | नेनिज् + तः → सन्धिकार्यम् → नेनिक्तः
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | नेनिज् + अति → नेनिजति

c. सन्धिकार्यम्—

नेनिज् + ति → **पुगन्तलघूपधस्य च** → नेनेज् + ति → **चोः कुः** → नेनेग् + ति → **खरि च** → नेनेक्ति
नेनिज् + सि → **पुगन्तलघूपधस्य च** → नेनेज् + सि → **चोः कुः** → नेनेग् + सि → **खरि च** → नेनेक् + सि → **आदेशप्रत्यययोः** → नेनेक्षि
नेनिज् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → नेनिज् + धि → **चोः कुः** → नेनिग् + धि → नेनिग्धि
अनेनिज् + त् → **पुगन्तलघूपधस्य च** (७.३.८६) → अनेनेज् + त् → **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (६.१.६७) → अनेनेज् → **चोः कुः**(८.४.५५) → अनेनेग् → **वाऽवसाने** (८.४.५६) → विकल्पेन अनेनेक्

**चोः कुः** (८.२.३०) = चवर्गस्य स्थाने कवर्गादेशो भवति पदान्ते झलि च | चोः षष्ठ्यन्तं, कुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **झलो**

**झलि** (८.२.२६) इत्यस्मात् **झलि** इत्यस्य अनुवृत्तिः | **स्कोः संयोगाद्योरन्ते च** (८.२.२९) इत्यस्मात् **अन्ते**, **च** इत्यनयोः अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **चोः कुः झलि पदस्य अन्ते च** |

**खरि च** (८.४.५५) = झलः स्थाने चरादेशो भवति खरि परे | खरि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **झलां जश् झशि** (८.४.५३) इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः; **अभ्यासे चर्च** (८.४.५४) इत्यस्मात् **चर्च** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **झलां चर् खरि च संहितायाम्** |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप-चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

<u>विजिँ → विज् धातुः</u> (उभयपदी, पृथग्भावे)

सर्वं कार्यं, रूपाणि च निज्-धातुरिव |

विज् → **श्लौ** → विज्-विज्→ **हलादिः शेषः** → विविज् इति अङ्गम् → **निजां त्रयाणां गुणः श्लौ** इत्यनेन अभ्यासे गुणः → वेविज् इति नूतनाङ्गम्

<u>विष्लृ → विष् धातुः</u> (उभयपदी, व्याप्तौ)

कार्यं रूपाणि च धिष्-धातुरिव; केवलम् अभ्यासे सर्वत्र गुणः इति भेदः |

विष् → **श्लौ** → विष्-विष्→ **हलादिः शेषः** → विविष् इति अङ्गम् → **निजां त्रयाणां गुणः श्लौ** इत्यनेन अभ्यासे गुणः → वेविष् इति नूतनाङ्गम्

3. <u>उदुपधधातवः</u>

एकः एव उदुपधधातुः अस्ति, तुर → तुर् इति |

<u>तुर → तुर् धातुः</u> (प्रस्मैपदी, त्वरणे)

a. द्वित्वम्, अभ्यासकार्यं च—
तुर् → **श्लौ** → तुर्-तुर् → **हलादिः शेषः** → तुतुर् इति अङ्गम्

b. अङ्गकार्यम्—

१) हलादि पित्सु = उपधायां लघु-इकः गुणः | तुतुर् + ति → **पुगन्तलघूपधस्य च** → तुतोर् + ति → तुतोर्ति
२) अजादि पित्सु = **नाभ्यस्तस्याचि पिति सार्वधातुके** इत्यनेन उपधायां लघु-इकः गुणनिषेधः | तुतुर् + आनि → **अट्कुप्वाङ्नुम्व्यवायेऽपि** (८.४.२) → तुतुराणि
३) हलाद्यपित्सु = **हलि च** इत्यनेन उपधादीर्घः | तुतुर् + तः → तुतूर् + तः → तुतूर्तः
४) अजाद्यपित्सु = **क्ङिति च**, गुणनिषेधः | तुतुर् + अति → तुतुरति

**हलि च** (८.२.७७) = हलि परे रेफान्तानां वकारान्तानां च धातूनाम् उपधायां स्थितः इक्–वर्णः दीर्घो भवति | हलि सप्तम्यन्तम्, च अव्ययपदम्, द्विपदमिदं सूत्रम् | **सिप धातो रुर्वा** (८.२.७४) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः; **र्वोरुपधाया दीर्घ इकः** (८.२.७६) इत्यस्य पूर्णतया अनुवृत्तिः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यस्य साहाय्येन तदन्तविधिः अतः **र्वोः** इत्यनेन येषाम् धातूनाम् अन्ते रेफः वकारश्च, तेषामपि ग्रहणम् | अनुवृत्ति–सहितसूत्रम्— **हलि च र्वोः धातोः उपधायाः इकः दीर्घः** |

c. सन्धिकार्यम्— सर्वत्र केवलं वर्णमेलनम् |

अग्रे चतुर्षु लकारेषु तिङन्तरूपाणि वक्तव्यानि | उपरि दत्तानां नियमानाम् आधारेण रूप–चिन्तनं करोतु |

<u>रूपाणि</u>
लटि —
लोटि—
लङि—
विधिलिङि—

अनेन जुहोत्यादिगणस्य हलन्तधातवः समाप्ताः |

Swarup — December 2013 (Updated Sept 2016)